ललित-नारायण-मिथिलाविश्वविद्यालयः

कामेश्वरनगरम्, दरभङ्गा - ८४६००४

मानविकीसङ्कायान्तर्गतसंस्कृतविभागे

विद्यावारिधिः(Ph.D.) इत्युपाधये प्रस्तुतः शोधप्रारूपः

विषयः - सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः तुलनात्मकमध्ययनम्

शोधनिर्देशकः

डा.-शशिकान्त-पाण्डेयः

सह-प्राध्यापकः,

संस्कृतविभागः,

गणेश-दत्त-महाविद्यालयः,

बेगुसरायः।

शोधार्थी

निरुप-माइतिः

PAT क्रमाङ्कः – E2218011

विभागीयक्रमाङ्कः – 05

बर्षः – 2021

दूरभाषः – 9933370590

सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः तुलनात्मकमध्ययनम्

निरुप-माइतिः

❖ **भूमिका-**

सांसारिकबन्धनादात्मानं विमोचनं, परमात्मनि च मिलनं हि मुक्तिः। प्रायः सर्वे मोक्षकामिनः पुनर्जन्मं नेच्छन्ति। जन्ममरणचक्रे आवर्तनं हि दुःखम्। पूर्णानन्दं मोक्षं वा प्राप्तुमावश्यकं प्रयासम्। परन्तु तत् कथं लभ्यते? केनोपायेन परमात्मना सह मिलनं भविष्यतीति मनसि निधाय मनीषिणः स्व स्व दृष्ट्या बहुमार्गान् निर्दिष्टवन्तः। यस्मात् भारतवर्षे दर्शनसम्प्रदायस्य सृष्टिरभूत्। विद्वत्सु केचन वेदोपदिष्टं मुक्तिमार्गं स्वीकृतवन्तः केचन पुनर्भिन्नयुक्त्या मुक्तेर्निर्वाणस्य वा प्राप्त्युपायो निर्दिष्टः।

तत्र 'एकमेवाद्वितीयं ब्रह्म'[१], 'द्वा सुपर्णा सयुजा सखाया'[२], 'अजामेकाम् लोहितकृष्णवर्णाम्'[३], 'य एतद्विदुरमृतास्ते भवन्ति'[४], अथवा 'अविद्ययामृत्युं तीर्त्वा विद्ययामृतमश्नुते'[५] इत्यादयो वेदवचांसि आदाय वेदान्तिनो येनरूपेण मोक्षस्योपायमुपदिशन्ति तथैव सांख्याः 'पञ्चविंशतितत्त्वज्ञानात् निःश्रेयसाधिगमः' अथवा 'व्यक्ताव्यक्तज्ञविज्ञानात्'[६] इति वदन्ति। पञ्चविंशति तत्त्वज्ञानेन हि व्यक्तिः केवली भवति ततः तस्य कैवल्यं प्राप्तिः।

न्यैयायिकानां मते पदार्थतत्त्वज्ञानेन हि मुक्तिः। यदुक्तं महर्षिणा गौतमेन 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानांतत्त्वज्ञानान्निःश्रेयसाधिगमः'[७]-

---

१. छा.उ.-६.२१
२. ऋ.वे.-१.१६४.२०
३. श्वे.उ.-४.५
४. तदेव-३.१
५. ई.उ.-३.११
६. सा.त.कौ.-२
७. न्या.सू.-१

5/4/24

इति। निःश्रेयसाधिगमो नाम मोक्ष इति। तन्निःश्रेयसाधिगमार्थं मोक्षार्थं परमपुरुषार्थं वा पदार्थतत्त्वज्ञानमावश्यकम्। प्रमाणादिषोडशपदार्थज्ञानेन मोक्षः सम्भव इति न्यायविदां मतम्। पदस्यार्थः पदार्थ इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणमिति लभ्यते। अत्रार्थो नामाभिधेयः। द्रव्यादौशब्दाभिधेयो वा। अमरकोषेऽपि तथा वर्तते - 'अर्थोऽभिधेय'[१] इति। दर्शनभेदेन पदार्था विविधा भवन्ति तद्यथा नैयायिकानां प्रमाणादयः षोडशो, वैशेषिकाणां द्रव्यादयः षट्, सप्त वा। सांख्यानां मते प्रकृत्यादयः पञ्चविंशतिः, योगे सेश्वराः प्रकृत्यादयः षड्विंशति। वेदान्तिनां मते चिदचिदात्मकौ द्वौ इति। तत्र वैशेषिकमार्गमाश्रित्य शिवादित्येन 'सप्तपदार्थी'इति ग्रन्थो रचितः। अपितु न्यायदर्शनमार्गाश्रयेण रघुनाथो रचितवान् 'पदार्थतत्त्वनिरूपन'मिति। अनयोर्विदुषोः प्रधानप्रतिपाद्यो विषयोऽस्ति पदार्थतत्त्वम्। उभयोर्विचारे भिन्नता लक्षीक्रियते। प्रकल्पितेऽस्मिन् शोधप्रबन्धे पदार्थानां विश्लेषणं हि मम गवेषणात्मकशोधप्रबन्धस्य मुख्यो विषयो भविष्यति।

❖ **कृतज्ञतार्पणम् :-**

हे कृष्ण करुणासिन्धो दीनबन्धो जगत्पते।

गोपेश गोपिकाकान्त राधाकान्त नमोऽस्तु ते।।

कार्यमात्रं प्रति परमकारणतया भगवान् श्रीकृष्णः सर्वादौ प्रणम्यते, यदनुग्रहं विना कस्यापि कार्यस्य सिद्धिरशक्यैव। मम पितरावपि प्रणम्येते, यत्प्रदत्तजीवनमादायात्र कर्मेदं कर्तुं प्रभवामः।

पुनः का गतिर्जीवनस्य गुरुं विना? ते तु शिष्यस्य व्रह्माविष्णुमहेश्वररूपाः–

5/4/24

कुलसचिव
कृष्णगुरु विश्वविद्यालय ... गवर्नमेंट विश्वविद्यालय ...

१. अ.को.- पृ-३५३

"गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुः सक्षात् परब्रह्म तस्मै श्रीगुरवे नमः।।"

ज्ञानसागरे सन्तरणाय तेषां प्रयोजनमामृत्युरावश्यकम्। शोधप्रारूपविषये येषां गुरुपादानां सर्वतोभावेन साहाय्यमवाप्तवान् तेभ्यो मदीयमार्गदर्शकेभ्य आचार्येभ्यो डाँ.-शशिकान्त-पाण्डेयेभ्यः कार्तज्ञ्यं निवेदयामि प्रणमामि च। येषामनवरतप्रेरणया भूतपूर्वयोगदानेन च शोधप्रारूपमिदं सम्पूर्णतामधिगतम्। येषां ज्ञानालोकेनालोकितोऽयं छात्रः शोधकार्यसम्पादनार्थं सन्मार्गे प्रवृत्तोऽभवत्।

मम उच्चतराध्ययनस्यान्तराले ये दण्डायमाना, येषामुत्साहेन च अत्राहमुपस्थितास्मि, तेषां मम गुरुपादानां घाटाल-रवीन्द्रशतवार्षिकी-महाविद्यालस्य संस्कृतविभागस्य विभागीयमुख्यरूपेणकार्यरतानां डाँ.-सुबोधकुमारनन्दमहाभागानां कृते प्रणतिकुसुमाञ्जलिं कार्तज्ञ्यं च व्याहरामि।

अस्मिन्नेवोपक्रमे मम मित्राणां सहाध्यायीनां कृतेऽपि कार्तज्ञतां ज्ञापयामि।

5/4/24

❖ **<u>शोधसमस्यासम्बन्धी कथनम् :-</u>**

वर्तमाने पदार्थतत्त्वमवलम्ब्य बहूनि पुस्तकानि लभ्यन्ते। इमानि पुस्तकानि पठनेन नवज्ञानानि जातानि। तत्सत्त्वेऽपि पदार्थविषये बहूनि अज्ञानानि सन्ति। इदमज्ञानं निवारणाय वैशेषिकदर्शनं, सप्तपदार्थी,

प्रशस्तपादभाष्यं, पदार्थतत्त्वनिरूपणमिति च ग्रन्थाः पठनीया आवश्यकमेव। परन्तु एतेषां ग्रन्थानां टीकाग्रन्थाः सुलभतया न विद्यन्ते। तत एव शोधसमस्या सम्मुखमागच्छति।

❖ <u>सर्वेक्षणम्-</u>

अनुसन्धानस्य एकं मुख्यमङ्गं भवति सर्वेक्षणम्। अनुसन्धाने सर्वेक्षणविधेर्महत्त्वं सततं विद्यत एव, सर्वत ईक्षणं मननमेव सर्वेक्षणम्। तत्र सप्तपदर्थ्या उपरि बहुनि शोधकार्याणि जातानि तथापि अद्यावधिः सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः तुलनात्मकमध्ययनमाधारीकृत्य किमपि शोधकार्यं न कुत्रापि जातमिति मनसि निधाय अस्मिन् कर्मणि प्रवृत्तोऽस्मि।

विभिन्नेषु विश्वविद्यालयेषु प्रस्तावितशोधः "सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः तुलनात्मकमध्ययणम्" अनेन सह सम्बन्धितः शोधप्रवन्धानां सूची निम्नलिखिता –

१. शिवादित्यकृत 'सप्तपदार्थी' का एक समीक्षात्मक अध्ययन – श्रीमती-उर्मिला-आनन्दः (काशी-हिन्दु-विश्वविद्यालयः) १९७८।

२. सप्तपदार्थी समीक्षात्मकं पठनम् – एस-एस-विवेकानन्दनः (श्री-शङ्कराचार्य-विश्वविद्यालयः) २००१।

5/4/24

❖ शोधविषयस्य प्रासङ्गिकता उद्देश्यश्च-

आत्मना सह परमात्मनो मिलनं हि मुक्तिः। परन्तु केनोपायेन मिलनमिदं भविष्यति? अनेन कारणेन भारते दर्शनसम्प्रदायस्य सृष्टिरभूत्। भारते नास्तिकास्तिकभेदेन द्विविधं दर्शनसम्प्रदायं परिलक्ष्यते। अनयोः पुनरास्तिकाः षड्विधाः, नास्तिका ये खलु वेदतत्वं न स्वीकुर्वन्ति ते अपि चार्वाकादिभेदेन त्रिविधाः। आस्तिकेषु न्याय-वैशेषिक-मीमांसा-सांख्य-योग-वेदान्तदर्शनानि प्रसिद्धानि। एतेषां पुनरवान्तरभेदा दरीदृश्यन्ते।

मोक्षलाभाय दार्शनिकैर्नैकविधा मार्गा अवलम्बिताः। तत्र वैशेषिकमार्गमाश्रित्य शिवादित्येन 'सप्तपदार्थी' इति ग्रन्थो रचितः। अपितु न्यायदर्शनमार्गाश्रयेण रघुनाथो रचितवान् 'पदार्थतत्त्वनिरूपन'मिति। अनयोर्विदुषोः प्रधानप्रतिपाद्यो विषयोऽस्ति पदार्थतत्त्वम्। उभयोर्विचारे भिन्नता लक्षीक्रियते। प्रकल्पितेऽस्मिन् शोधप्रबन्धे पदार्थानां विश्लेषणं कर्तुमस्ति मे मनसि वलवतीच्छा। पदार्थतत्त्वविषये आचार्यद्वयस्य एषा पृथक् भावना, पुनर्भावनोद्भूतं यथार्थपदार्थज्ञानं च हि मम गवेषणात्मकशोधप्रबन्धस्य मुख्य उद्देश्यः।

❖ **ग्रन्थयोर्विषयवस्तु -**

सप्तपदार्थीग्रन्थानुरूपं पदार्थभावना-

वङ्गेषु न्यायसम्प्रदाये शिवादित्यो नाम तर्कवागीशो विराजते। अयं तर्कवगीशः ११५० ईसवीये वर्षे जन्मं नीतवान् इति विद्वांसो मन्यन्ते। लोकानुग्रहपरायणः शिव इव दार्शनिकः शिवादित्यः 'सप्तपदार्थीति' ग्रन्थो रचितवान्। तेन विरचितेषु ग्रन्थेषु ग्रन्थोऽयं तार्किकाणां पुरतो नयनमणिरिव भाति। सप्तपदार्थीति नामानुसारं शिवादित्यपादैः पदार्थः सप्तविध इति स्वीकृतः।

शिवादित्येन 'प्रमितिविषयाः पदार्थाः'[१]- इति पदार्थभेदलक्षणं कृतम्। तस्यायमाशयो यत् पदार्थो नाम प्रमितिविषयः। तत्र प्रमितिर्नाम यथार्थानुभवः, तस्य विषयाः प्रमेयाः। प्रमेयत्वमेव पदार्थशब्दस्य प्रवृत्तिनिमित्तमित्यनेन दर्शितम्, न तु प्रमितिविषयत्वं पदार्थसामान्यलक्षणं केवलान्वयित्वेन प्रमेयत्वस्य लक्षणत्वायोगात् केवलव्यातिरेकी हेतुविशेषो लक्षणमिति तल्लक्षणस्याभिधास्यमानत्वात्। नन्वत्रापि भ्रमविषयो व्यावर्त्योऽस्तीति चेन्न। तस्यापि कदाचित् प्रमेयत्वात्, शुक्तिर्वा रजतं वा तादात्म्यं वा भ्रमविषयो रजतत्वसंसर्गो वा एते सर्वे प्रमेया एव। तत्र पदार्थानां विभागविषये तेनोक्तम्- 'ते च द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावव्याख्या सप्तैव'[२] इति।

प्रसंगेऽस्मिन् अन्नंभट्टः सप्तत्वे लब्धे सप्तग्रहणं किमर्थमिति प्रश्नोत्थाप्य तदीये तर्कसंग्रहदीपिकायामुक्तम्- "नन्वत्र विभागादेव चेदुच्यते न, अधिकसंख्याव्यवच्छेदार्थत्वात्। नन्वतिरिक्तः पदार्थः प्रमितो न वा? नाद्यः प्रमितस्य निषेधयोगात्। नान्त्यः प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न। पदार्थत्वं द्रव्यादि-सप्तान्यतमत्वव्याप्यमिति व्यावच्छेदार्थत्वात्। ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वम्। एवञ्च सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति चेन्न। द्रव्यादि सप्तान्यतमत्वं द्रव्यादिभेदसप्तकाभाववत्त्वमिति तदर्थत्वात्"[३] इति।

---

१. स.प.-१

२. तदेव-२

३. त.सं.दी.-२

शिवादित्यस्यपदार्थतत्त्वं भावाभावत्वेन द्विधा विभाजयितुं शक्नुमः। तयोः भावपदार्थेषु प्रथमं तावत्द्रव्यमिति। अस्य पदार्थस्य लक्षणविषये तेनोक्तम्- 'द्रव्यं तु- द्रव्यत्वसामान्ययोगि गुणवत् समवायिकारणं चेति'[१] । द्रव्यमिदं नवविधम्। तद्यथा- पृथिव्यप्तेजो-वाय्वाकाश-काल-दिगात्म-मनांसीति।

द्वितीयः पदार्थो गुणः। गुणत्वजातिमान् गुणः। गुणस्य चतुर्विंशतभेदा भवन्तीति न्यायवैशेषिकानां मतम्। सप्तपदार्थीति ग्रन्थे तथा स्वीकृत्य शिवादित्येनोक्तम्- 'गुणास्तुरूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथकत्व-संयोग-विभाग-परत्वापरत्व-बुद्धि-सुख-दुखेच्छा-द्वेष-प्रयत्न-गुरुत्व-द्रव्यत्व-स्नेह-संस्कार-धर्माधर्म-शब्दाश्चतुर्विंशतिरेव'[२]। कर्म तु पञ्चविधम्- 'कर्मण्युत्क्षेपणापक्षेपणाकुञ्चन-प्रसारण-गमणानि पञ्चैव'[३] -इति। शिवादित्यनये सामान्यं तु त्रिविधम्-'सामान्यं परमपरं परापरञ्चेति त्रिविधम्'[४] इति। विशेषपदार्थविषये शिवादित्यस्य मतमस्ति- 'विशेषस्तु सामान्यरहित एकव्यक्तिवृत्तिः'[५]-इति।

द्वितीय अभावपदार्थश्चतुर्विधः। यथा प्रागभाव-प्रध्वंसाभावान्योन्याभावात्यन्ताभावश्चेति।

अन्धकारविषये शिवादित्यपादैर्भणितम्- 'अन्धकारोऽप्यभावः'[६] इति।

<u>पदार्थतत्त्वनिरूपणग्रन्थानुरूपं पदार्थभावना-</u>

नव्यन्यायाचार्येषु तार्किकशिरोमणिः कल्पनाधिनाथः श्रीरघुनाथोऽन्यतमः। बङ्गदेशवास्तव्योऽयं १४५५ ईसवीये वर्षे जन्मं नीतवान् इति विद्वांसो मन्यन्ते। अस्य गुरव आसन् दर्शनमार्तण्डाः श्रीमन्तः सार्वभौमपादाः। नव्यन्यायस्य मूलभूतग्रन्थस्य चिन्तामणौ श्रीरघुनाथशिरोमणेश्चास्ति 'दीधिति'

१. पूर्वोक्तः ग्रन्थः,स.प.-५९
२. तदेव-४
३. तदेव-५
४. तदेव-६
५. तदेव-६३
६. तदेव-४४

5/4/24

नाम्नी टीका। इमामेव टीकामाश्रित्य गादाधरी-टीका, जगदीशीटीकानामपि निर्माणं जातम् ।

रघुनाथशिरोमणिर्न्यायशास्त्रे प्राचीननवीनमतानि समवलोक्य 'युक्तियुक्तं वचो ग्राह्यमिति' पन्थानमनुसृत्य पदार्थविमर्शनं कृत्वा प्राक्तनसिद्धान्तेषु 'पदार्थतत्त्वनिरूपण'नामकेन ग्रन्थरत्नेन पुनर्नवीकरणमकरोत्। अत्र रघुनाथशिरोमणिना पूर्वोक्ताः केचन पदार्था विमृश्य यथा खण्डिताः, तथैव पूर्वतनैः खण्डिताश्च केचन पदार्थाः पुनर्मण्डिताश्च। पदार्थानां खण्डनं कृतमिति हेतोः ग्रन्थस्यास्य पदार्थखण्डनमित्यपि नाम प्रसिद्धमस्ति। द्रव्यादयः प्राचीनपरिगृहीताः पदार्थाः सप्त। तत्र विचारपुरस्सरं केषाञ्चिदाधिक्यं निराकरिष्यन्, आधिक्यमपि केषाञ्चित् व्यवस्थापयिष्यन् वस्तुव्यावस्थापकं सिद्धान्तप्रवादमात्रं मनसिकृत्य प्रतिजानीते। चतुर्दशपदार्थाः अतिरिक्ततया नावश्याङ्गीकर्तव्या इति निराकृताः। चतुर्णां चातिरिक्तता संस्थापिता। द्वादशपदार्थाः परिष्कृताश्चास्मिन् ग्रन्थे, ते च- दिक्-कालयोः ईश्वरानतिरिक्तता, मनोनिरासः, परमाणु-द्व्यणुकनिरासः, ईश्वरे परिमाणनिरासः, रूपादीनामिन्द्रियाग्राह्यत्वनिरासः, पृथक्त्वनिराकरणम्, परत्वापरत्वनिरासः, प्रयत्ननिरूपणम्, विशेषनिरासः, रूपादीनामव्याप्यवृत्तित्वविचारः, चित्ररूपनिरासः, रस-स्पर्श-कर्मणामव्याप्यवृत्तित्वम्, वायुप्रत्यक्षताविचारः, अनुपलब्धिवादः, सत्तानिरासः, गुणत्वजातिनिरासः, अनुभवत्वजातिनिरासः, अभावाभावस्यातिरिक्तता, प्रागभावनिरासः, प्रत्यभिज्ञाविचारः, संशयलक्षणम्, क्षणपदार्थविचारः, स्वत्वविचारः, शक्तेरतिरिक्तत्वम्, कारणत्वस्यातिरिक्तपदार्थाः, संख्यातिक्तपदार्थः, समवायनानात्वनिरासः, ज्ञातताविचारः इति। निराकृताः पदार्थाः- दिक्, कालः, मनः, परमाणुः, द्व्यणुकम्, ईश्वरपरिमाणम्। पृथक्त्वम्, परत्वापरत्वे, विशेषः, सत्ता, प्रागभावः, चित्ररूपम्, गुणत्वजातिः, अनुभवत्वमिति। तत्र व्यावस्थापिताः पदार्थाः- कारणत्वम्, वैशिष्ट्यम्, संख्या, वायुप्रत्यक्षता, अभावाभावस्यातिरिक्तता, समवायनानात्वमिति।

शिवादित्यमहापादैर्वैशेषिकमतमवलम्ब्य द्रव्यादिसप्तपदार्थाः तेषां भेदाश्च स्वीकृताः। एवं रघुनाथशिरोमणिनापि केचन पदार्थाः सयुक्तिभिरस्वीकृताः।

❖ प्रक्षेत्रः परिसीमा च-

शिवादित्याचार्येण वैशेषिकमार्गमाश्रित्य 'सप्तपदार्थी'इति ग्रन्थः रचितः। अपितु रघुनाथशिरोमणिः न्यायदर्शनमार्गाश्रयेण रचितवान् 'पदार्थतत्त्वनिरूपण'मिति। अनयोर्विदुषोः प्रधानप्रतिपाद्यो विषयोऽस्ति पदार्थतत्त्वम्। शिवादित्यो वैशेषिकदर्शनस्य मौलतत्त्वाधारेण द्रव्यादिनां सप्तपदार्थानां स्वरूपमालोचितवान् स्वग्रन्थे। परन्तु रघुनाथेन पदार्थनिरूपणेति ग्रन्थे नव्यन्यायदर्शनानुसारं पदार्थानां स्वरूपं व्याख्यातम्। उभयोर्विचारे भिन्नता लक्षीक्रियते। अनयोर्विदुषोर्भिन्नग्रन्थाः स्यादपि प्रस्तुतशोधविषयस्य उद्देश्य-गुण-दोषाणाञ्च निराकरणमपि आलोचयिष्यन्ति। आलोचितदोषस्य उल्लेख्यमपि यथास्थानं वर्णयिष्यति।

❖ अनुसन्धानविधिः दृष्टिकोणः च :-

साम्प्रतिके वैज्ञानिकयुगेऽस्मिन् जीवनस्य समाजस्य वा प्रत्येकमपि क्षेत्रं गवेषणामूलकं परिलक्ष्यते। अद्यतनसमये मानवो जीवनपथे धावता वेगेन अग्रसरति, यः खलु युक्तिं विना किमपि तथ्यं यथार्थप्रमाणरूपेण नाङ्गीकुरुते, अतः सर्वत्र ज्ञानविज्ञानयोनवीनं रमणीयं तथ्यमाविष्कर्तुं प्रयतते। यथा ईशावास्योपनिषदि-

"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये"॥[१]

5/4/24

तदेवानुसन्धानं यदज्ञानाच्छादितं तत्त्वमुन्मोच्य जगति ज्ञानालोकं प्रकाशयति, एतस्य ज्ञानतत्त्वस्य युगानुरूपं मूल्याङ्कनं नाम शोधकार्यम्, तत्र "सत्यं ज्ञानम् अनन्तं ब्रह्म" इति श्रुत्या परिदृश्यमाने जगति ज्ञानस्य परिसरो

---

१. ई.उ.-१५

व्यापकः। उक्तं च उदयनाचार्येण "विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये....." अतः समुचितम् अविस्तृततरं च क्षेत्रमवलम्ब्य गवेषणात्मकं कार्यं सम्पादनीयम्। इदानीं गवेषकाः शोधप्रकाराणां विविधतां विचारयन्ति। समीक्षकाणां मतानुसारं बहुविधाः शोधा भवितुमर्हन्ति। तथाहि- १)तुलनात्मकः, २)समीक्षात्मकः, ३)सम्पादनात्मकः, ४)तथ्यानुसन्धानात्मकः, ५)वस्तुभित्तिकः, ६)पर्यवेक्षणात्मकश्चेति। उपर्युक्तेषु प्रस्तुतमनुसन्धानं तुलनात्मकं विद्यते।

"सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः तुलनात्मकमध्ययनम्" इत्याख्यस्य शोधप्रबन्धस्य प्रस्तुत्यवसरे तुलनात्मकमध्ययनं किमपि नूतनत्वमुद्भावयिष्यति। यतः तत्र सप्तपदार्थी-पदार्थतत्त्वनिरूपणग्रन्थयोः विद्यमानानां तथ्यानां पुनः पुनर्निरीक्षणपुरस्सरं सावधानतया विश्लेषणं करिष्यते। अनेन शोधसन्दर्भस्य मौलिकता सारवत्ता च साधयिष्यते। एवञ्च अनुसन्धानविधौ बहुनि प्रमुखानि अङ्गानि सन्ति। तानि च-

१. निरीक्षणम्

२. कल्पना

३. प्रयोगः

४. तथ्यसंग्रहः

५. विश्लेषणम्

६. व्याख्या

७. सत्यता

८. मूल्याङ्कनम्

९. सामान्यीकरणम्

१०. निष्कर्षः

3/4/24

विषयानुक्रमणिका-

विषयाः पृष्ठम्

❖ प्राक्कथनम्-

❖ प्रथमोऽध्यायः-

विषयप्रवेशः-

❖ द्वितीयोऽध्यायः-

सप्तपदार्थीग्रन्थानुरूपं पदार्थभावना- १.द्रव्यम्

२.गुणः

३.कर्म

४.सामान्यम्

❖ तृतीयोऽध्यायः-

सप्तपदार्थीग्रन्थानुरूपं पदार्थभावना- ५.विशेषः

६.समवायः

७.अभावः।

❖ चतुर्थोऽध्यायः-

पदार्थतत्त्वनिरूपणग्रन्थानुरूपं पदार्थभावना-

१.द्रव्यम्- i.दिक्-कालयोरीश्वरानतिरिक्तता।

ii.मनोनिरासः

iii. ईश्वरे परिमाणनिरासः

iv. वायुप्रत्यक्षताविचारः

२.गुणः- i.रूपादीनामिन्द्रियाग्राह्यत्वनिरासः

5/4/24

ii.पृथक्त्वनिराकरणम्

iii.परत्वापरत्वनिरासः

❖ **पञ्चमोऽध्यायः-**

<u>पदार्थतत्त्वनिरूपणग्रन्थानुरूपं पदार्थभावना-</u>

iv.प्रयत्ननिरूपणम्

v.रूपादीनामव्याप्यवृत्तित्वविचारः

vi.चित्ररूपनिरासः

v. रस-स्पर्शयोरव्याप्यवृत्तित्वम्

३.कर्म- i.कर्मणोऽव्याप्यवृत्तित्वम्

❖ **षष्ठोऽध्यायः-**

<u>पदार्थतत्त्वनिरूपणग्रन्थानुरूपं पदार्थभावना-</u>

४.सामान्यम्- i.सत्तानिरासः

ii.गुणत्वजातिनिरासः

iii.अनुभवत्वजातिनिरासः

५.विशेषः- i.विशेषनिरासः

ii. परमाणु-द्व्यणुकनिरासः

६.समवायः- i. समवायनानात्वनिरासः

७.अभावः- i.अभावाभावस्यातिरिक्तता

ii.प्रागभावनिरासः

❖ **सप्तमोऽध्यायः**

<u>पदार्थतत्त्वनिरूपणग्रन्थानुरूपं क्षणादिणां पदार्थत्वम्-</u>

5/4/24

८.क्षणपदार्थविचारः

९.स्वत्वविचारः

१०.शक्तेरतिरिक्तत्वम्

११.कारणत्वस्यातिरिक्तपदार्थः

१२.संख्यातिरिक्तपदार्थः

१३.वैशिष्ट्यम्

❖ **अष्टमोऽध्यायः**

ग्रन्थयोः तुलनात्मकमध्ययनम्-

❖ उपसंहारः-

❖ सहायकग्रन्थपञ्जी–

5/4/24

❖ **उपसंहारः-**

दार्शनिकैर्मोक्षलाभाय नैकविधा मार्गा अवलम्बिताः। न्यायवैशेषिका अपि तत् प्राप्तये शास्त्राणि विरचितानि। अस्मिन् दर्शने गौतमस्य न्यायसूत्रं, कणादस्य वैशेषिकसूत्रमित्यादयो ग्रन्थाः सन्ति। सर्वेषां लक्ष्यं मोक्ष एव। तत्र वैशेषिकमार्गमाश्रित्य शिवादित्येन 'सप्तपदार्थी'इति ग्रन्थो रचितः। अपितु न्यायदर्शनमार्गाश्रयेण रघुनाथो रचितवान् 'पदार्थतत्त्वनिरूपनमिति। अनयोर्विदुषोः प्रधानप्रतिपाद्यो विषयोऽस्ति पदार्थतत्त्वम्। शिवादित्यो वैशेषिकदर्शनस्य मौलतत्त्वाधारेण द्रव्यादिनां सप्तपदार्थानां स्वरूपमालोचितवान् स्वग्रन्थे। परन्तु रघुनाथेन पदार्थनिरूपणेति ग्रन्थे नव्यन्यायदर्शनानुसारं पदार्थानां स्वरूपं व्याख्यातम्। उभयोर्विचारे भिन्नता लक्षीक्रियते। प्रकल्पितेऽस्मिन् शोधप्रवन्धे प्राचीन-नवीनयोर्मतानि गृहीत्वा पदार्थानां विश्लेषणं कर्तुमस्ति मे मनसि वलवतीच्छा। पदार्थतत्त्वविषये आचार्यद्वयस्य एषा पृथक् भावना, पुनः

भावनोद्भूतं यथार्थपदार्थज्ञानं च हि मम गवेषणात्मकशोधप्रबन्धस्य मुख्यो विषयो भविष्यति।

❖ <u>ग्रन्थसङ्केताः-</u>

अ. को.=अमरकोषः

ई.उ.=ईशोपनिषद्

ऋ.वे.=ऋग्वेदः

छा.उ.=छान्दग्योपनिषद्

त.स.दी.=तर्कसंग्रहदीपिका

न्या.सू.=न्यायसूत्रम्

श्वे.उ.=श्वेताश्वतरोपनिषद्

सा.त.कौ.=सांख्यतत्त्वकौमुदी

स.प.=सप्तपदार्थी

❖ <u>सहायकग्रन्थपञ्जी-</u>

१. अमरसिंहः. *अमरकोषः.* सम्पा. श्रीमद्गुरुनाथ-विद्यानिधि-भट्टाचार्यः. कोलकाता: संस्कृत पुस्तक भाण्डारः, १९८८.

२. आचार्य, उदयनः. *किरणावली.* सम्पा. गौरीनाथ-शास्त्री (प्रथम-तृतीयखण्डम्). कोलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९०.

३. आचार्य, उदयनः. *न्यायकुसुमाञ्जलिः.* सम्पा. वाचस्पति-द्विवेदी. वाराणसी: राष्टीयसंस्कृतसंस्थानम्, २००१.

४. आचार्य, माधवः. *सर्वदर्शनसंग्रहः.* सम्पा. सत्यज्योति-चक्रबर्त्ती (द्वितीयखण्डम्). कोलकाता: साहित्यश्री, १३८६.

५. आचार्य, वल्लभः. *न्यायलीलावती.* सम्पा. पण्डित-हरिहर-शास्त्री. वाराणसी: चौखम्बा संस्कृत सीरीज अफिस, १९९१.

६. आचार्य, व्योमशिवः. *व्योमवती.* सम्पा. गौरीनाथ शास्त्री. वाराणसी: सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, १९८३.

७. कणादः. *वैशेषिकदर्शनम्.* सम्पा. डा.अमित-भट्टाचार्यः. कोलकाता: संस्कृत बुक डिपो, २०१२.

८. कणादः. *वैशेषिकसूत्रोपस्कारः.* सम्पा. शेख-साविर-आलिः. कोलकाता: संस्कृत बुक डिपो, २०१३.

९. गौतमः. *न्यायसूत्रम्.* सम्पा. महेश-झा. वाराणसी: चौखम्बा संस्कृत सीरीज आफिस्, २०१३.

१०. तर्कवागीश, फणिभूषणः. *न्यायदर्शनम्(प्रथमखण्डम्).* कोलकता: संस्कृत बुक डिपो, २०१४.

११. तर्कवागीश, फणिभूषणः. *न्यायपरिचयः.* कोलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९८६.

१२. न्यायतर्कतीर्थ, तारानाथः. *न्यायदर्शनम्.* दिल्ली: मुन्सिराममनोहरलाल्, २००३.

१३. पाण्डेय, श्रीकान्तः. *भारतीय दर्शनम्.* मेरठ: साहित्यभाण्डारः, १९८६.

5/4/24

१४. प्रशस्तपादः. *पदार्थधर्मसंग्रहः.* सम्पा. डा.अनामिका-रायचौधुरी. कोलकाता: संस्कृत पुस्तक भाण्डारः, २०१७.

१५. प्रशस्तपादः. *प्रशस्तपादभाष्यम् (द्वितीयभागः).* सम्पा. ब्रह्मचारी-मेधाचैतन्यः. कोलकाता: संस्कृत बुक डिपो, २०००.

१६. प्रशस्तपादः. *प्रशस्तपादभाष्यम् (प्रथमोभागः).* सम्पा. ब्रह्मचारी-मेधाचैतन्यः. कोलकाता: संस्कृत बुक डिपो, २०१७.

१७. भट्ट, कुमारिलः. *श्लोकवार्तिकम्.* सम्पा. ई.श.वदराचार्यः. नव दिल्ली: राष्टीय संस्कृत संस्थानम्, २०१२.

१८. मुनिश्रीलावण्यविजयः. धातुपाठकोशः. सम्पा. डा.सुबोधकुमारनन्दः. कोलकाता: दा बनारस मर्केन्टाइल को., २०२०

१९. विश्वनाथः. *भाषापरिच्छेदः.* सम्पा. पञ्चानन-शास्त्री. कोलकाता: संस्कृत पुस्तक भाण्डारः, १९८९.

२०. शर्मा, नारायणः. *वैशेषिकदर्शनम् (एकाध्ययनम्).* वाराणसी: चौखाम्बा विद्याभवनम्, १९६१.

२१. शिरोमणि, रघुनाथः. *पदार्थतत्त्वनिरूपणम्.* कोलकाता: संस्कृत कालेज, १९७६.

२२. शिरोमणि, रघुनाथः. *पदार्थतत्त्वनिरूपणम्.* सम्पा. आचार्यः-हरेकृष्णशतपथी डा.पा.ति.गु.यतिराजसम्पत्कुमराचार्यः. तिरुपतिः: राष्ट्रीयसंस्कृतविद्यापीठम्, २०१०.

२३. शिवादित्यः. *सप्तपदार्थी.* सम्पा. जय भट्टाचार्यः. कोलकाता: कलकाता रामकृष्ण मिशन इनिस्टिटिउट् अव् कालचार, २०१०.

२४. शिवादित्यः. *सप्तपदार्थी.* सम्पा. डा. अमरेन्द्रमोहन-देवशर्मा. कोलकाता: १९३४.

२५. शिवादित्यः. *सप्तपदार्थी.* सम्पा. ड. अमरेन्द्रमोहन-देवशर्मा. कोलकाता: १९३४.

२६. शिवादित्यः. *सप्तपदार्थी.* सम्पा. तपनशङ्कर-भट्टाचार्य. कोलकाता: संस्कृत बुक डिपो, २०१२.

२७. हरिभद्रः. *षड्दर्शनसमुच्चयः.* सम्पा. एल. साउलि. कोलकाता: दि एशियाटिक सोसाइटि, १९८६.

२८. आनन्दः, श्रीमती-उर्मिला. *शिवादित्यकृत सप्तपदार्थी का एक समीक्षात्मक अध्ययन.* वाराणसी: काशी हिन्दु विश्वविद्यालयः, १९७८.

२९. कुमारः, शशीप्रभा. *वैशेषिक दर्शन में पदार्थ-निरूपण.* दिल्ली: डीके प्रिंटवर्ल्ड प्रा. लिमिटेड, २०१३.

३०. Dasgupta, Surendranath. (1922). *A History of Indian Philosophy.* (I-V). Cambridge University Press.

३१. Dravid, Rajeshwara Sastri. (1925). *Nyayavartika-Tatparya Tika.* Chowkhamba Sanskrit Series Office.

३२. Dvivedi, Girija Prasad. (1917). *Manusmriti.* Newnl Kishore-Vidyalaya.

३३. Phukan, Radhanath. (1960). *The Sāṃkhya Kārikā of Īśvarakṛṣṇa.* Firma K. L. Mukhopadhyay.

३४. Śāstrī, Gangādhara. (1896). *The Nyāyasūtras.* (IX). Benares.

5/4/24

३५. Sharma, Sri Rama. (1964). *Nyaya-Darsan*. Sanaskriti Sansthan.

३६. Sharma, Umashankar. (1968). *Sarvadarśanasaṃgraha*. Chowkhamba Vidyabhavan.

३७. Thakur, Anantalal. (1997). *Nyāyabhāṣyavārttika*. Indian Council of Philosophical Research.

३८. Vedantacharya, Dr. Swami Satya prasad dasji. (2010). *Indian Philosophy*. Shree Swaminrayan mandir.

३९. Vidyabhusana, Mahamahopadhaya Satisa Chandra. (1913). *Nyāyasūtra Of Goutama*. The Panini Office.

४०. https://archive.org

४१. https://www.indianculture.gov.in

5/4/24

शोधनिर्देशक:

Nirup Maity

शोधार्थी